श्रीगणेशायनमः॥ॐ अथपुरुषोहवैनारायणोकामयत।प्रजाःसृजे
येति।नारायणात्प्राणोजायते।मनःसर्वेंद्रियाणि।खंवायुर्ज्योतिरापः
पृथिवीविश्वस्यधारिणी।नारायणाद्ब्रह्मजायते।नारायणाद्रु
द्रोजायते।नारायणादिंद्रोजायते।
नारायणात्प्रजापतिःप्रजायते।नारायणाद्द्वादशादित्याः।रु
द्रावसवःसर्वाणिचछंदांसि।नारायणादेवसमुत्पद्यंते॥ना
रायणात्प्रवर्त्तंते।नारायणात्प्रतिष्ठंते।नारायणात्प्रलीयंते
अथरुद्रोनारायणोऽहंनारायणःस्त्रीवश्यनारायणः॥

शंकरश्चनारायणः।कालश्चनारायणः।रिश्चनारायणः।ध्रुवश्च
नारायणः।अधश्चनारायणः।अंतर्बहिश्चनारायणोनारायणः
वेदसर्वंयद्भूतंयच्चभव्यं।निष्कलोनिरंजनोनिर्विकल्पोनिराख्या
तः।शुद्धोदेवएकोनारायणोनद्वितीयस्तस्कश्चित्।यएवंवेद।
सविष्णुरेवभवतिसविष्णुरेवभवति।ॐइत्यग्रेव्याहरत्।नमइति
पश्चात्।नारायणायेत्युपरिष्टात्।ॐइत्येकाक्षरं।नमइतिद्व
अक्षरे।नारायणायेतिपंचाक्षराणि।एतद्वैनारायणस्याष्टाक्षरंप
दं।योहवैनारायणस्याष्टाक्षरपदमध्येति।अनपद्वःसर्वमायुरेति। १

विंदतेप्राजापत्यं।रायस्पोषंगोपत्यं।ततोमृतत्वमश्नुतेततोमृतत्व
मश्नुतइति।प्रत्यगानंदंब्रह्मपुरुषंप्रणवस्वरूपंॐअकारउकारम
कारइति।तानेकधासमभरत्तदेतदोमितियमुच्चामुच्यतेयोनि
र्जन्मसंसारबंधनात्।ॐनमोनारायणायेतिमंत्रोपासकोवैकुंठभु
वनंलोकंगच्छतिवैकुंठभुवनंलोकंगच्छति।तद्विष्णोःपरमंपदंपुंडरीकं
विद्मानघनंत्रिसभाक्षंविश्वेषांजंतूनांवसतिंनिहितंगुहाकाशे।तस्मान्नादिरावभासतेब्रह्मण्यो देवकीपुत्रोब्रह्म
ण्योमधुसूदनोसर्वंखल्विदंब्रह्मतस्मैवैनमोनमः।नारायणंकारणरूपाकारंपरब्रह्म।ॐएतदथर्वशीर्षंयोधीतेसायमधीयानोदिवसकृतंपापं

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातरधी
यानो अपापो भवति। मध्यंदिनमादित्याभिमुखोधीयानः पंचम
महापातकोपपातकेभ्यो मुच्यते। सर्ववेदपारायणपुण्यं भवति।
श्रीनारायणसायुज्यमवाप्नोति। यएवंवेद इत्युपनिषत्॥७
इत्यथर्वशीर्षसमाप्तः॥इदंपुस्तकं परशुरामजोगळेकरस्य
रामरुद्रजोगळेकरेणलिखितं॥क्रोधीकृष्णचतुर्थ्यांरात्रौ
१७९७राक्षसनामसंवत्सरेसमाप्तं॥शुभंभवतु॥श्रीनारायणा
र्पणमस्तु॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ २